# সংস্কৃতটীকা

## সায়ণাচার্যঃ

প্রখ্যাতবেদভাষ্যকাররূপেণ সায়ণাচার্যঃ ন কেবলং ভারতবর্ষে, সমগ্রে বিশ্বেঽপি সুপরিচিতঃ। ঋগ্বেদ-অথর্ববেদ-সামবেদ-যজুর্বেদ-তৈত্তরীয় সংহিতা-তৈত্তিরীয় ব্রাহ্মণ-তৈত্তিরীয় আরণ্যক-ঐতরেয় ব্রাহ্মণ-শতপথব্রাহ্মণ-বৈদিকসাহিত্যস্য সুবিশালে ক্ষেত্রে ভাষ্যকাররূপেণ সায়ণাচার্যস্য উপস্থিতিঃ।

প্রখ্যাতঃ দর্শনিকপ্রবরঃ মাধবাচার্যঃ সায়ণাচার্যস্য অগ্রজঃ। মাধব-সায়ণয়োঃ পিতুর্ণাম্ অপি সায়ণঃ মাতা চ শ্রীমতী দেবী।

দক্ষিণভারতস্য কর্ণাটরাজ্যস্থিতে বিজয়নগরে (বিদ্যানগরে বা) সঙ্গমরাজবংশস্য রাজত্বম্ আসীৎ। রাজা চ মহারাজঃ বুক্কঃ। সায়ণাচার্যস্য অগ্রজঃ মাধবাচার্যঃ বুক্কনৃপস্য কুলগুরুঃ তথা প্রধানমন্ত্রী আসীৎ। তস্য পরামর্শানুসারং সায়ণাচার্যঃ বেদব্যাখ্যানে নিযুক্তঃ অভবৎ।

খ্রীঃ ১৩৫৪-১৩৭৭ পর্যন্তং কর্ণাটরাজ্যে বুক্কনৃপস্য শাসনম্ আসীৎ। মাধবাচার্যাৎ পরং সায়ণাচার্যঃ কর্ণাটরাজস্য মন্ত্রী অভবৎ। ১৩৮৭ খ্রীষ্টীয়াব্দে সায়ণাচার্যস্য জীবনাবসানং অভবৎ।

সায়ণাচার্যঃ মীমাংসকঃ দার্শনিকঃ আসীৎ। 'সর্বদর্শনসংগ্রহঃ' ইতি গ্রন্থঃ মাধবসায়ণভ্রাতৃভ্যাং যৌথভাবেন বিরচিতঃ।

## শৌনকঃ

শুনকস্য অপত্যম্ ইত্যর্থে শুনক + অঞ্ শৌনকঃ (অনুধ্যানস্তর্যে বিদাদিভ্যোঽঞ্)। শুনকঃ অন্যতমঃ বৈদিকর্ষিঃ। সঃ চ আচার্যত্বেন বৃতঃ আসীৎ।

মহর্ষিঃ শৌনকঃ তস্য শুনকাচার্যস্য পুত্রঃ। সোঽপি বেদাচার্যঃ। বহবঃ বৈদিকাঃ লৌকিকাশ্চ গ্রন্থাঃ শৌনকাচার্যেণ বিরচিতাঃ। শৌনকেন রচিতানাং গ্রন্থানাং অন্যতমাঃ ভবন্তি—অনুবাক্যাক্রমণিঃ, আয়ুষ্যহোমপদ্ধতিঃ, আর্যানুক্রমণিঃ, উগ্ররথশান্তিপ্রয়োগঃ, উদকশান্তিপ্রতিসর বন্ধ প্রয়োগঃ, উপলেখবৃত্তিঃ, ঋগ্‌বিধানম্, ঋগ্বেদপ্রাতিশাখ্যম্, ঋষিছন্দোঽনুক্রমণিকা, একদণ্ডিসন্ন্যাসবিধিঃ, বৃহদ্দেবতা প্রভৃতয়ঃ।

আচার্যঃ শৌনকঃ বহূনি ধর্মশাস্ত্রাণি অপি রচিতবান্। তেষু ধর্মশাস্ত্রেষু অন্যতমানি বাস্তুশান্তিঃ, বিবাহপটলঃ, বিষ্ণুধর্মঃ, শান্তিঃ, সন্ন্যাসবিধিঃ, সোমোৎপত্তিশ্চেতি।

## সামবেদসংহিতা

চতুর্বিধেষু বেদেষু সামসংহিতা তথা সামবেদঃ অন্যতমঃ। গীতিষু সামাখ্যা- যে চ বৈদিকমন্ত্রাঃ সুরসহযোগেন যজ্ঞকর্মসু প্রযুক্তাঃ ভবন্তি তে খলু সামমন্ত্রাঃ। সামমন্ত্রাণাং সঙ্কলনং হি সামসংহিতা। ব্যাখ্যামুখেন সায়নাচার্যেন উক্তম্- 'গীতিরূপাঃ মন্ত্রাঃ সামানি'।

সামবেদস্য মন্ত্রসংখ্যা ১৫৪৯। তেষু সামবেদীয়মন্ত্রেষু ৭৫ সংখ্যকাঃ মন্ত্রাঃ স্বাধীনসামমন্ত্রাঃ, অন্যে চ ঋগ্বেদাৎ গৃহীতাঃ।

সামবেদস্য বিবিধাঃ শাখাঃ বিদ্যন্তে। উক্তং চ মহাভাষ্যকারেণ পতঞ্জলিনা- 'সহস্রবর্ত্মা সামন্'। জৈমিনিমহাভাগঃ ব্যাসদেবাৎ সামবেদং প্রাপ্তবান্। পরবর্ত্তীযুগে শিষ্য প্রশিষ্য ক্রমেন সামবেদস্য বিবিধাঃ শাখাঃ সৃষ্টাঃ। অধুনা উপলব্ধাসু সামশাখাসু অন্যতমাঃ-কৌথুমী, রাণায়নীয়া, জৈমিনীয়া চ। সামবেদস্য অষ্টৌ ব্রাহ্মণাঃ-প্রৌঢ়-ষড়্বিংশ-সামবিধান-অর্ষেয়-দৈবত-মন্ত্রব্রাহ্মণ-সংহিতোপনিষৎ-বংশব্রাহ্মণাঃ। সামবেদস্য উপনিষদ্গ্রন্থঃ-ছান্দোগ্যোপনিষৎ কেনোপনিষৎ চ।

## আরণ্যকম্

বৈদিকসাহিত্যস্য চত্বারঃ পর্যায়াঃ সন্তি-মন্ত্রঃ সংহিতা বা-ব্রাহ্মণ-আরণ্যক-উপনিষৎ চ। তেষু পর্যায়েষু আরণ্যকং নাম তৃতীয়ঃ পর্যায়ঃ। আরণ্যকশব্দস্য ব্যাখ্যামুখেন শঙ্করাচার্যেণ উক্তম্-অরণ্যে অনূচ্যমানত্বাৎ আরণ্যকমিতি সংজ্ঞা। আরণ্যকং তু ব্রাহ্মণভাগস্য পরিশিষ্টরূপম্। মন্ত্রব্রাহ্মণাত্মকস্য বেদস্য ব্রাহ্মণভাগস্য আধ্যাত্মিকালোচনম্ আরণ্যকম্। জ্ঞানকর্মণোঃ সমুচ্চয়ঃ আরণ্যকভাগস্য আলোচ্যবিষয়ঃ।

অথর্ববেদমন্তরেণ অন্যেষাং বেদানাং পৃথকারণ্যকং বিদ্যতে। যথা ঋগ্বেদস্য-ঐতরেয়ারণ্যকম্, শাঙ্খায়ণারণ্যকং চ।

সামবেদস্য-ছান্দোগ্যারণ্যকম্। শুক্লযজুর্বেদস্য-বৃহদারণ্যকম্ কৃষ্ণযজুর্বেদস্য-তৈত্তিরীয়ারণ্যকম্। অথর্ববেদস্য কিমপি আরণ্যকং নাস্তি।

আরণ্যকানি গদ্যরচিতানি। আরণ্যকাণাং ভাষাশৈলী ব্রাহ্মণসদৃশী।

## শতপথ ব্রাহ্মণম্

বৈদিকসাহিত্যস্য চত্বারঃ পর্যায়াঃ সন্তি। মন্ত্রঃ সংহিতা বা -ব্রাহ্মণ-আরণ্যক-উপনিষৎ চ। তেষু পর্যায়েষু ব্রাহ্মণং নাম দ্বিতীয়ঃ পর্যায়ঃ। বৈদিকমন্ত্রাণাং তথা যাগযজ্ঞাদীনাং ব্যাখ্যা-বিশ্লেষণং ব্রাহ্মণম্। ব্রহ্মন্ বেদবাচকঃ। বেদেন সম্বন্ধিতং ব্রাহ্মণম্।

সর্বেষাং বেদানাং স্বতন্ত্রঃ ব্রাহ্মণগ্রন্থঃ বিদ্যতে। শুক্লযজুর্বেদস্য ব্রাহ্মণং শতপথব্রাহ্মণম্।

সমগ্রে বৈদিকসাহিত্যে শতপথব্রাহ্মণস্য সমধিকং গুরুত্বং বর্ততে। শতপথব্রাহ্মণস্য দ্বে শাখে-মাধ্যন্দিনশাখা কাণ্বশাখা চেতি। উভয়শাখায়াং শতাধ্যায়াঃ সন্তি। অধ্যায়ঃ অত্র 'পথ' শব্দেন চিহ্নিতঃ। শতঃ অধ্যায়াঃ তথা শতঃ পন্থাঃ ইতি শতপথব্রাহ্মণম্। কাণ্বশাখায়াঃ শতপথব্রাহ্মণে ১০৪ অধ্যায়াঃ সন্তি, মাধ্যন্দিনশাখায়াঃ চ শতঃ অধ্যায়াঃ। বিষয়বৈচিত্র্যে গুরুত্বে চ শতপথব্রাহ্মণং বৈদিকসাহিত্যে অতুলনীয়ম্। সর্বেষাং শ্রৌতযজ্ঞানুষ্ঠানানাং ইষ্টি-দর্শপূর্ণমাস-পিতৃযজ্ঞ-চাতুর্মাস্যযাগানাং বিস্তৃতং বিবরণং শতপথব্রাহ্মণে উপলব্ধম্। নৃপাণাং রাজ্যাভিষেকানাং প্রাচীনভারতবর্ষস্য ঐতিহাসিকতথ্যানাং বিবরণম্ অত্র প্রাপ্যতে। বিখ্যাতা বৃহদারণ্যকোপনিষৎ অস্মিন্নেব ব্রাহ্মণে সমুপলভ্যতে।

## ঐতরেয়ব্রাহ্মণম্

বৈদিকসাহিত্যস্য চত্বারঃ পর্যায়াঃ সন্তি। মন্ত্রঃ সংহিতা বা -ব্রাহ্মণ-আরণ্যক-উপনিষৎ চ। তেষু পর্যায়েষু ব্রাহ্মণং নাম দ্বিতীয়ঃ পর্যায়ঃ। বৈদিকমন্ত্রাণাং তথা যাগযজ্ঞাদীনাং ব্যাখ্যা-বিশ্লেষণং ব্রাহ্মণম্। ব্রহ্মন্ বেদবাচকঃ। বেদেন সম্বন্ধিতং ব্রাহ্মণম্।

ঋগ্বেদস্য দ্বৌ ব্রাহ্মণগ্রন্থৌ স্ত-ঐতরেয় ব্রাহ্মণং কৌষীতকিব্রাহ্মণঞ্চ। ইতরাপুত্রঃ মহীদাসঃ ঐতরেয় ব্রাহ্মণস্য প্রণেতা। মাতুর্ণামানুসারং মহীদাসরচিতব্রাহ্মণং ঐতরেয় ব্রাহ্মণমিতি প্রসিদ্ধম্।

ব্রাহ্মণগ্রন্থেষু ঐতরেয়ব্রাহ্মণস্য গুরুত্বং সমধিকম্। অস্মিন্ ব্রাহ্মণে সর্বেষাং প্রকৃতি-বিকৃতিযাগানাং নৃপাণাং রাজ্যাভিষেকানাং চ ক্ষেত্রেষু ঋগ্বেদীয়পুরোহিতস্য হোতৃনামকস্য ঋত্বিজঃ কর্ত্তব্যং উপদিষ্টম্। ঐতরেয়ব্রাহ্মণম্ অষ্টৌ খণ্ডেষু বিভক্তম্। বর্ষকালসাধ্যস্য গবাময়নসত্রযাগস্য প্রকৃতিরপি অত্র ব্যাখ্যাতা। দক্ষিণাপ্রশস্তিঃ পুরোহিতপ্রশংসা অপি ঐতরেয়ব্রাহ্মণে আলোচিতা। অগ্নিষ্টোম্-জ্যোতিষ্টোমাদীনাং সোমযাগানাং বিবিধপ্রায়শ্চিত্তাদীনাং চ বিস্তৃতবিবরণমত্র উপলব্ধম্।

## শিক্ষাবেদাঙ্গম্

বেদানাম্ অঙ্গাম্-বেদাঙ্গাম্। বেদঃ অঙ্গী প্রধানঃ। তস্য প্রধানস্য বেদস্য যৎ উপকারকং তৎ বেদাঙ্গাম্। বৈদিকমন্ত্রাণাম্ অর্থাববোধায় ব্যাখ্যাবিশ্লেষণায় চ বেদপরবর্ত্তিনি যুগে বেদাঙ্গসাহিত্যস্য সৃষ্টিঃ। তচ্চ বেদাঙ্গং ষড়্বিধম্। মুণ্ডকোপনিষদি অপরাবিদ্যায়াঃ দৃষ্টান্তমুখেন বেদাঙ্গানাং নামোল্লেখং জাতম্-

তত্রাপরা ঋগ্বেদো যজুর্বেদঃ সামবেদোঽথর্ববেদঃ।
শিক্ষা কল্পোব্যাকরণং নিরুক্তং ছন্দোজ্যোতিষম্।।

শিক্ষা নাম প্রথমং বেদাঙ্গম্। যস্মিন্ বেদাঙ্গে বর্ণস্বরমাত্রাদীনাং যথাযথম্ উচ্চারণং প্রয়োগবিধিশ্চ উল্লিখিতঃ তৎ শিক্ষাবেদাঙ্গম্। আধুনিকধ্বনিবিজ্ঞানস্য উৎসঃ ভবতি শিক্ষাবেদাঙ্গম্।

বর্ণ-স্বর-মাত্রা-বল-সাম-সন্ধানম্ ইত্যেতানি বিষয়ানি আলোচিতানি শিক্ষাবেদাঙ্গে। উল্লেখ্যং যৎ প্রত্যেকবেদানাং স্বতন্ত্রঃ শিক্ষাগ্রন্থঃ বিদ্যতে। যথা ঋগ্বেদস্য ঋক্প্রাতিশাখ্যম্ বৃহদ্দেবতা, সামবেদস্য নারদশিক্ষা, যজুর্বেদস্য যাজ্ঞবল্ক্যশিক্ষা, অথর্ববেদস্য মাণ্ডুকী শিক্ষা। শিক্ষাবেদাঙ্গং বেদপুরুষস্য ঘ্রাণত্বেন স্বীকৃতম্-শিক্ষা ঘ্রাণং তু বেদস্য।

## নিরুক্তম্

বেদানাম্ অঙ্গম্-বেদাঙ্গম্। বেদঃ অঙ্গী প্রধানঃ। তস্য প্রধানস্য বেদস্য যৎ উপকারকং তৎ বেদাঙ্গম্। বৈদিকমন্ত্রাণাম্ অর্থাববোধায় ব্যাখ্যাবিশ্লেষণায় চ বেদপরবর্তিনি যুগে বেদাঙ্গসাহিত্যস্য সৃষ্টিঃ। তচ্চ বেদাঙ্গং ষড়্বিধম্। মুণ্ডকোপনিষদি অপরাবিদ্যায়াঃ দৃষ্টান্তমুখেন বেদাঙ্গানাং নামোল্লেখং জাতম্-

তত্রাপরা ঋগ্বেদো যজুর্বেদঃ সামবেদোঽথর্ববেদঃ।
শিক্ষা কল্পোব্যাকরণং নিরুক্তং ছন্দোজ্যোতিষম্।।

নিরুক্তং অন্যতমং বেদাঙ্গম্। নিরুক্তং বেদপুরুষস্য শ্রোত্রত্বেন কল্পিতম্- 'নিরুক্তং শ্রোত্রমুচ্যতে'। নিরুক্তং যাস্কাচার্যেণ রচিতম্। নির্ নিশেষেণ পদসমূহঃ যস্মিন্ উক্তঃ তৎ নিরুক্তম্। নিরুক্তগ্রন্থস্য ত্রয়ঃ বিভাগাঃ বর্তন্তে -নৈঘন্টককাণ্ডম্, নৈগমকাণ্ডম্, দৈবতকাণ্ডঞ্চেতি। অনুক্রমণিকাভাষ্যে নিরুক্তস্য বিভাগত্রয়ং সমুল্লিখিতম্-

আদ্যং নৈঘুন্টকং কাণ্ডং দ্বিতীয়ং নৈগমং তথা।
তৃতীয়ং দৈবতঞ্চেতি সমান্মায়স্ত্রিধা স্থিতঃ।

নিরুক্তস্য কাণ্ডত্রয়ং পুনঃ অধ্যায়েষু বিভক্তম্-যথা নৈঘন্টুক কাণ্ডে পঞ্চাধ্যায়াঃ, নৈগমে ষড়ধ্যায়াঃ দৈবতে চ পুনঃ ষড়ধ্যায়াঃ।

## নিঘন্টুঃ

যাস্কাচার্যপ্রণীতস্য নিরুক্তগ্রন্থস্য প্রথমাধ্যায়ঃ নিঘন্টুঃ। নিঘন্টুঃ নৈগমকাণ্ডমিতি পরিচিতম্। নিঘন্টুকাণ্ডে পঞ্চাধ্যায়াঃ সন্তি। ইদং শব্দার্থকাণ্ডমিত্যপি পরিচিতম্। সমানার্থকানাং তথা পর্যায়শব্দানাং উপদেশঃ অত্র বিহিতঃ।

নিঘন্টুশব্দস্যার্থঃ সমানার্থকানাং পর্যায়শব্দানাম্ উপদেশঃ। কোষগ্রন্থেষু নিঘন্টুঃ শব্দার্থকাণ্ডরূপেণ উল্লিখিতঃ। গোশব্দাৎ দেবপত্নীপর্যন্তশব্দানাং নির্বচনং নিঘন্টু কাণ্ডে প্রতিপাদিতম্।

কেষাঞ্চিৎ মতানুসারং নিঘন্টুঃ যাস্কপূর্ববর্ত্তী কশ্চিৎ কোষগ্রন্থঃ। নিঘন্টুঃ প্রাচীনতমঃ অভিধানগ্রন্থঃ। যাস্কঃ নিঘন্টুমনুসৃত্য তস্য নিরুক্তং রচিতবান্। নৈঘন্টুককাণ্ডে যাস্কাচার্যেন নিঘন্টুগ্রন্থস্য শব্দতালিকা উল্লিখিতা- 'সমাম্নায়ঃ সমাম্নাতঃ স ব্যাখ্যাতব্যঃ'। অর্থাৎ নিঘন্টুগ্রন্থে প্রস্তুতা শব্দতালিকা যাস্কাচার্যেণ ব্যাখ্যাতা। অথ দৃশ্যতে নিঘন্টুঃ যাস্কাচার্যস্য পূর্ববর্ত্তীশব্দশাস্ত্রম্।

## আশ্বলায়নঃ

আশ্বলায়নঃ সুপ্রাচীনঃ বৈদিকর্ষিঃ। ঋগ্বেদস্য শাখাবিশেষস্য প্রবর্ত্তকঃ মহর্ষিঃ আশ্বলায়নঃ। আশ্বলায়নশাখানুগামিণঃ ঋত্বিজাঃ আশ্বলায়নশ্রৌতসূত্রং তথা আশ্বলায়নগৃহ্যসূত্রমবলম্ব্য শ্রৌতকর্মাণি গৃহ্যকর্মাণি চ সম্পাদয়ন্তি।

আশ্বলায়নঃ সুপ্রসিদ্ধঃ কল্পসূত্রকারঃ। বৈদিকযজ্ঞকর্মাণাং সহজং স্মরণাবধারণার্থং তেন কল্পসূত্রং প্রণীতম্। তদীয়ে শ্রৌতসূত্রে শ্রৌতকর্মাণাং, গৃহ্যসূত্রে চ গার্হস্থ্যকর্মাণাং বিধিব্যবস্থা পর্যালোচিতা।

মহর্ষিঃ আশ্বলায়নঃ প্রখ্যাতবেদাচার্যস্য শৌনকস্য শিষ্যঃ আসীৎ। 'শৌনকস্য শিষ্যোঽভূদ্ ভগবান্ আশ্বলায়নঃ'। শ্রূয়তে চ, আশ্বলায়নস্য গুরুঃ শৌনকোঽপি পূর্বং একং কল্পসূত্রং রচিতবান্। কিন্তু শিষ্যকৃতস্য কল্পসূত্রস্য উপাদেয়ত্বং প্রামাণ্যত্বং চ পরিজ্ঞায় শৌনকঃ স্বকৃতং কল্পসূত্রং স্বহস্তং বিনষ্টম্ অকরোৎ। কল্পসূত্রমন্তরেণ ঋগ্বেদস্য ঐতরেয়ারণ্যকস্য চতুর্থারণ্যকমপি আশ্বলায়নেন কল্পিতম্।

আশ্বলায়নশ্রৌতসূত্রং দ্বাদশাধ্যায়েষু বিভক্তম্। তত্র দর্শপূর্ণমাস-বিবিধেষ্টিযাগ-পশুযাগ-সোমযাগ-চাতুর্মাস্যাদীনাং বিবরণং প্রদত্তম্। আশ্বলায়নগৃহ্যসূত্রং চতুরাধ্যায়েষু রচিতম্। গার্হস্থ্যাশ্রমস্য বিধিবিধানানি অত্র নির্দিষ্টানি অভবন্। আশ্বলায়নস্য আবির্ভাবকালঃ খ্রী. পূ. চতুর্থ-পঞ্চম শতকঃ-ইত্যনুমীয়তে।

## শ্রৌতসূত্রম্

বেদানাম্ অঙ্গাম্-বেদাঙ্গাম্। বেদঃ অঙ্গী প্রধানঃ। তস্য প্রধানস্য বেদস্য যৎ উপকারকং তৎ বেদাঙ্গাম্। বৈদিকমন্ত্রাণাম্ অর্থাববোধায় ব্যাখ্যাবিশ্লেষণায় চ বেদপরবর্ত্তিনি যুগে বেদাঙ্গাসাহিত্যস্য সৃষ্টিঃ। তচ্চ বেদাঙ্গ ষড়্‌বিধম্। মুণ্ডকো‌পনিষদি অপরাবিদ্যায়াঃ দৃষ্টান্তমুখেন বেদাঙ্গানাং নামোল্লেখং জাতম্-

তত্রাপরা ঋগ্বেদো যজুর্বেদঃ সমাবেদোঽথর্ববেদঃ।
শিক্ষা কল্পোব্যাকরণং নিরুক্তং ছন্দোজ্যোতিষম্।।

ষট্‌বেদাঙ্গেষু অন্যতমম্ কল্পবেদাঙ্গাম্। কল্পতে সমর্থ্যতে যাগযজ্ঞাদয়ঃ যেন তৎ কল্পম্।

(১) সংস্কৃত বর্ত্তিকা বৈদিক সাহিত্যের ইতিহাস-৪

ব্রাহ্মণগ্রন্থেষু যাগযজ্ঞাদীনাং বিবরণং বহুধাবিস্তৃতম্। ব্যাখ্যাভাষ্যৈঃ আখ্যানোপাখ্যানৈঃ বিস্তৃতস্য যজ্ঞবিধানস্য সহজং স্মরণমননার্থং কল্পবেদাঙ্গং তথা কল্পসূত্রং রচিতম্। তস্য চ কল্পসূত্রস্য দ্বে বিভাগে-শ্রৌতসূত্রং গৃহ্যসূত্রং চ।

শ্রুতৌ ভব ইতি শ্রুত + অণ্ = শ্রৌতঃ। যজ্ঞকর্মাদিবৈদিকাচারবিধিঃ শ্রৌতশব্দেন বোধ্যতে। বহুধা বিস্তৃতানাং বৈদিকানুষ্ঠানানাং সূত্রাকারেণ সংবদ্ধ্য শ্রৌতসূত্রম্ রচিতম্। সর্বেষাং বেদানাং স্বতন্ত্র শ্রৌতসূত্রমস্তি। যথা ঋগ্বেদস্য আশ্বলায়নশ্রৌতসূত্রম্, শাংখ্যায়ন শ্রৌতসূত্রম্, সামবেদস্য লাট্যায়ন-আর্ষেয়-দ্রাহ্যায়ন-জৈমিনীয় শ্রৌতসূত্রম্, কৃষ্ণ যজুর্বেদস্য বৌধায়ন-আপস্তম্ব-মানব-সত্যাষাঢ়-বৈখানসশ্রৌতসূত্রম্, শুক্লযজুর্বেদস্য কাত্যায়ন শ্রৌতসূত্রম্ অথর্ববেদস্য বৈতানশ্রৌতসূত্রম্।

## গৃহ্যসূত্রম্

বেদানাম্ অঙ্গাম্-বেদাঙ্গাম্। বেদঃ অঙ্গী প্রধানঃ। তস্য প্রধানস্য বেদস্য যৎ উপকারকং তৎ বেদাঙ্গাম্। বৈদিকমন্ত্রাণাম্ অর্থাববোধায় ব্যাখ্যাবিশ্লেষণায় চ বেদপরবর্ত্তিনি যুগে বেদাঙ্গাসাহিত্যস্য সৃষ্টিঃ। তচ্চ বেদাঙ্গং ষড়্বিধম্। মুণ্ডকোপনিষদি অপরাবিদ্যায়াঃ দৃষ্টান্তমুখেন বেদাঙ্গানাং নামোল্লেখং জাতম্-

তত্রাপরা ঋগ্বেদো যজুর্বেদঃ সমাবেদোঽথর্ববেদঃ।
শিক্ষা কল্পোব্যকরণং নিরুক্তং ছন্দোজ্যোতিষম্।।

ষট্‌বেদাঙ্গেষু অন্যতমম্ কল্পবেদাঙ্গাম্। কল্পতে সমর্থ্যতে যাগযজ্ঞাদয়ঃ যেন তৎ কল্পম্। ব্রাহ্মণগ্রন্থেষু যাগযজ্ঞাদীনা বিবরণং বহুধাবিস্তৃতম্। ব্যাখ্যাভাষ্যৈঃ আখ্যানোপাখ্যানৈঃ বিস্তৃতস্য যজ্ঞবিধানস্য সহজং স্মরণমননার্থং কল্পবেদাঙ্গং তথা কল্পসূত্রং রচিতম্। তস্য চ কল্পসূত্রস্য দ্বে বিভাগে-শ্রৌতসূত্রং গৃহ্যসূত্রং চ।

গৃহ্যতে মানবাদিভিঃ ইতি গ্রহ্ + ক্যাপ্ (পদাস্বৈরিবাহ্যাপক্ষেষু পা. ৩.১.১১৯)। গার্হস্থ্যাশ্রমোপযোগিবৈদিকলৌকিকবিধানং গৃহ্যসূত্রস্য বিষয়বস্তু। গৃহস্থানাং পঞ্চমহাযজ্ঞম্ গর্ভাধানাৎ প্রেতকৃত্যপর্যন্তম্ আচারানুষ্ঠানং গৃহ্যসূত্রস্য অন্তর্ভুক্তম্। সর্বেষাং বেদানাং স্বতন্ত্রং গৃহ্যসূত্রং বিদ্যতে। যথা-ঋগ্বেদস্য আশ্বলায়ন শাংখ্যায়ন গৃহ্যসূত্রম্, সামবেদস্য দ্রাহ্যায়ন-গোভিল-জৈমিনীয়-খাদিরগৃহ্যসূত্রম্, কৃষ্ণযজুর্বেদস্য বৌধায়ন-আপস্তম্ব-মানব-হিরণ্যকেশী গৃহ্যসূত্রম্, শুক্লযজুর্বেদস্য পারস্কর গৃহ্যসূত্রম্, অথর্ববেদস্য কৌশিকগৃহ্যসূত্রম্।

## বৃহদ্দেবতা

ষট্‌বেদাঙ্গেষু অন্যতমং শিক্ষাবেদাঙ্গাম্। বৃহদ্দেবতা শিক্ষাবেদাঙ্গাস্য অনুসারী গ্রন্থঃ। শিক্ষা বেদাঙ্গম্। বৃহদ্দেবতা উপাঙ্গাম্। আচার্য শৌনকঃ বৃহদ্দেবতায়াঃ রচয়িতা।